श्री महाविष्णु स्तुतिः

श्री महाविष्णु स्तुतिः

ब्रह्मर्षय ऊचुः |
नमस्ते देवदेवानामादिभूत सनातन |
पुरुषाय पुराणाय नमस्ते परमात्मने || 1 ||

जरामरणरोगादिविहीनायामलात्मने |
ब्रह्मणां पतये तुभ्यं जगतां पतये नमः || 2 ||

लोकालोकस्वरूपाय लोकानां पतये नमः |
शंखचक्रगदापद्मपाणये विष्णवे नमः || 3 ||

नमो हिरण्यगर्भाय श्रीपते भूपते नमः |
नमः स्वयंभुवे तुभ्यं सूत्रात्मादिस्वरूपिणे || 4 ||

विराट् प्रजापतेः साक्षाज्जनकाय नमो नमः |
विश्वतैजसरूपाय प्राज्ञरूपाय ते नमः || 5 ||

जाग्रत्स्वप्नस्वरूपाय नमः सुप्त्यात्मने नमः |
अवस्थासाक्षिणे तुभ्यमवस्थावर्जिताच्युत || 6 ||

तुरीयाय विशुद्धाय तुर्यातीताय ते नमः |
प्रथमाय समस्तस्य जगतः परमात्मने || 7 ||

ओंकारैकस्वरूपाय शिवाय शिवद प्रभो |
सर्वविज्ञानसंपन्न नमो विज्ञानदायिने || 8 ||

जगतां योनये तुभ्यं वेधसे विश्वरूपिणे |
नित्यशुद्धाय बुद्धाय मुक्ताय सुखरूपिणे || 9 ||

नमो वाचामतीताय मनोऽगम्याय ते नमः |
अप्रमेयाय शांताय स्वयंभानाय साक्षिणे || 10 ||

नमः पुंसे पुराणाय श्रेयःप्राप्त्येकहेतवे |
आकाशादिप्रपंचाय नमस्तद्रूप शंकर || 11 ||

मायारूपाय मायायाः सत्ताहेतो जनार्दन |
नमः प्रद्युम्नरूपाय नमः संकर्षणात्मने || 12 ||

नमोऽनिरुद्धरूपाय वासुदेवाय ते नमः |
योगाय योगगम्याय योगिनामिष्टसिद्धिद || 13 ||

नमस्ते मत्स्यरूपाय नमस्ते कूर्मरूपिणे |
नमस्तुभ्यं वराहाय नारसिंहाय ते नमः || 14 ||

नमो वामनरूपाय नमो रामत्रयात्मने |
नमः कृष्णाय सर्वज्ञ नमस्ते कल्किरूपिणे || 15 ||

कर्मिणां फलरूपाय कर्मरूपाय ते नमः |
कर्मकर्त्रे नमस्तुभ्यं नमस्ते कर्मसाक्षिणे || 16 ||

नमो विज्ञप्तिरूपाय नमो वेदांतरूपिणे |
गुणत्रयात्मने तुभ्यं नमो निर्गुणरूपिणे || 17 ||

अद्भुतायामरेशाय शिवप्राप्त्येकहेतवे |
नमो नक्षत्ररूपाय नमस्ते सोमरूपिणे || 18 ||

नमः सूर्यात्मने तुभ्यं नमो वज्रधराय ते |
नमस्ते पद्मनाभाय नमस्ते शार्ङ्गपाणये || 19 ||

नमस्तुभ्यं विशालाक्ष नमः श्रीधर नायक |
नमः संसारतप्तानां तापनाशैकहेतवे || 20 ||

श्रौतस्मार्तैकनिष्ठानामचिरादेव मुक्तिद |
अन्येषामपि सर्वेषां संसारैकप्रदाव्यय || 21 ||

नमोऽसुरविमर्दाय नमो विद्याधरार्चित |
क्षीरोदशायिने तुभ्यं नमो वैकुंठवासिने |
नमो रागाभिभूतानां वैराग्यप्लवदायिने || 22 ||

इति सूतसंहितायां श्री महाविष्णु स्तुतिः |